No. १४१५ / क

Title शारदा तन्त्रोक्त: सर्वतोभद्रमण्डल प्रकार:

Author

Extent २ पत्र Age

Subject तन्त्र

शारदातिलकोक्तः सर्वतोभद्रमंडलप्रकारः

शारदातंत्रोक्तसर्वतोभद्रमंडलप्रकार:

२ नं० ~~२११८~~

३६७



॥श्रीः॥

१ सर्वतोभद्रमण्डल शारदायाम् चतुरस्रे
चतुःकोष्ठकर्णसूत्रसमन्विते चतुर्थेपि च कोष्ठे
षु कोणसूत्रचतुष्टयम् मध्ये मध्ये यथा मत्स्या भवे
युः पातयेत्तथा पूर्वोऽपरा यतेद्वे द्वे मंत्री याम्यो
त्तरायते पातायत्तेषु मत्स्येषु समं सूत्रचतुष्टयं पूर्व
वत् कोणकोष्ठेषु कर्णसूत्राणि पातयेत् तदुद्भूतेषु
मत्स्येषु दद्यात् सूत्रचतुष्टयं ततः कोष्ठेषु मत्स्याः
स्युस्तेषु सूत्राणि पातयेत् यावत् शतद्वयं मंत्री षट्पं
चाशत् पदान्यपि तावत्तेनैव विधिना तत्र सूत्राणि
पातयेत् षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सु
लक्षणं बहिः पंक्त्या भवेत् पीठं पंक्तियुग्मेन वी
थिका द्वारशोभोपशोभाभ्यां शिष्टाभ्यां परिकल्पयेत्
शास्त्रोक्तविधिना मंत्री ततः पद्मं समालिखेत् प
द्मक्षेत्रस्य संत्यज्य द्वादशांशं बहिः सुधीः तन्मध्ये वि
भजेद्वृत्तैस्त्रिभिः समविभागतः आद्यं स्यात् कर्णिका
स्थानं केशराणां द्वितीयकं तृतीयं पद्मपत्राणां मु
कांशेन दलाग्रकं बाह्यवृत्तान्तरालस्य मानेन विडि
नास्सुधीः आलिखेद्बाह्यहस्तेन दलाग्राणि समंततः
दलमूलेषु युगशः केशराणि प्रकल्पयेत् एतत्
साधारणं प्रोक्तं पंकजं तत्र वेदिभिः पदानि त्रीणि
पादार्थं पीठकोणेषु मार्जयेत् अवशिष्टैः पदैर्विद्वा
न् पीठगात्राणि कल्पयेत् पदानि वीथिसंस्थानि
मार्जयेत् पंक्तिभेदतः दिक्षु द्वाराणि रचयेद्
द्विचतुःकोष्ठकैस्ततः पदैस्त्रिभिरथैकेन शोभाः
स्युर्द्वारपार्श्वयोः उपशोभाः ।: ....

स्तरेकेन त्रिभिः कोष्ठैरनंतरं अवशिष्टैः पदैः प
न्तुभिः कोणानां स्यात्चतुष्टयं रंजयेत् पंचभिर्वर्णैर्म
ण्डलं तन्मनोहरं पीतं हरिद्राचूर्णंस्यात् सितं तण्डु
लसम्भवं कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाक
लजं बिल्वादिपत्रजं श्यामममित्युक्तं वर्णपंचकं अ
गुलोत्सेध विस्ताराः सीमारेखाः सिताः शुभाः
कर्णिका पीतवर्णेन केशराण्यरुणेनच शुक्लव
र्णानि पत्राणि तत्सन्धीन् श्यामलेन च रजसा
रंजयेन्मंत्री यद्वा पीतैव कर्णिका केशराः पीतर
क्ताः स्वरुणानि दलानि च सन्धयः कृष्णवर्णाः
स्तः सितेनाप्यसितेन वा रंजयेत् पीठगर्भाणि पा
दाः स्वरुणप्रभाः गात्राणि तस्य शुक्लानि वीथि
षु च चतस्रषु आलिखेत् कल्पलतिका दल पुष्प
समन्विताः उपशोभाः पीतवर्णाः कोणान्यसितभा
निच तिस्रो रेखा वहिः कार्य्याः सितारक्तासिताः
क्रमात्॥ मण्डले सर्वतोभद्रमेतत् साधारणं मतं॥